2026

UGSVDS602

यजुर्वेदीयसाहित्यम्

Full Marks : 60

Time : 2 Hours

(The figures in the margin indicate full marks for the questions)

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् **1×10=10**

1. शुक्लयजुर्वेदस्य कति शाखाः वर्तन्ते?
2. महीधरभाष्यस्य नाम किम्?
3. शतरुद्रियाध्यायस्य ऋषिः कः?
4. रुद्रशब्दस्य निर्वचनं किम्?
5. 'याज्ञवल्क्यशिक्षा' नामको शिक्षाग्रन्थः केन प्रणीतम्?
6. विवृत्तेः कति भेदाः?
7. वाजसनेयिप्रातिशाख्ये कति अध्यायाः सन्ति ?
8. अनन्तभट्टकृतस्य भाष्यस्य नाम किम् ?
9. स्वरभक्तयः कति विधाः?
10. 'जविष्ठम्' इति शब्दस्य कोऽर्थः?

अधोलिखितानां पञ्चानां व्याख्या विधेया – **6×5=30**

11. . हरिः ॐ । इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मेण
आप्यायध्व-मघ्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत
माघशंसो ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्याहि ॥
12. नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः ।
बाहुभ्यामुत ते नमः ॥
13. शुक्लवर्णानि नामानि आख्याता रोहिताय मताः।
कपिलास्तूपसर्गाश्च कृष्णाश्चैव निपातकाः॥
14. पदपूर्वमामन्त्रितमनानार्थेऽपादादौ ।
15. यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥

16. यज्ञस्य घोषदसि, प्रत्युष्ट रक्षः प्रत्युष्टा अरातयः प्रेयमगाद्भिषणा बर्हिरच्छ मनुना कृता स्वधा वितष्टा त आ वहन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे देवानां परिषूतमसि वर्षवृद्धमसि देवबर्हिर्मा त्वाऽन्वङ्गा तिर्यक्पर्व ते राध्यासमाच्छेत्ता ते मा रिषं देवबर्हिः शतवल्शं वि रोह सहस्रवल्शाः वि वयं रुहेम पृथिव्याः संपृचः पाहि सुसमृता त्वा सं भराम्यदित्यै रास्नांऽसीन्द्राण्यै संनहनं पूषा ते ग्रन्धि ग्रंथ्नातु ते माऽऽ स्थादिन्द्रस्य त्वा बाहुभ्यामुद्यच्छे बृहस्पतेः तेर्मूर्धा हराम्युर्वन्तरिक्षमन्विहिं देवंगममसि।
17. वर्णानां विवरणं, ते किं वर्ण-दैवत-लिङ्गाः।

अधस्तनेषु द्वौ प्रश्नौ समाधेयौ - **10×2=20**

18. शुक्लयजुर्वेदस्य काण्वमाध्यन्दिनसंहितयोः विषयाणामुल्लेखं कुरुत।
19. रुद्रस्य माहात्म्यं लिख्यताम्।
20. पदानां रूपाणि गोत्राणि दैवतानि च निरूप्यताम्।
21. प्रातिशाख्यम् इति पदस्य कोऽर्थः? प्रातिशाख्यग्रन्थानां प्रयोजनमधिकृत्य एको लेखः प्रस्तूयताम्।

****